# Shri Bhanuvinayaka Stuti Arunakrita

# અરુણકૃતા શ્રીભાનુવિનાયકસ્તુતિઃ

## Document Information

Text title : Shri Bhanuvinayaka Stuti Arunakrita

File name : bhAnuvinAyakastutiHaruNakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 43 | 6.43 33-45||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

Shri Bhanuvinayaka Stuti Arunakrita

# અરુણકૃતા શ્રીભાનુવિનાયકસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
અરુણ ઉવાચ ।
નમસ્તે ગણનાથાય તેજસાં પતયે નમઃ ।
અનામયાય દેવેશ આત્મને તે નમો નમઃ ॥ ૩૩॥
બ્રહ્મણાં પતયે તુભ્યં જીવાનાં પતયે નમઃ ।
આખુવાહનગાયૈવ સપ્તાશ્વાય નમો નમઃ ॥ ૩૪॥
સ્વાનન્દવાસિને તુભ્યં સૌરલોકનિવાસિને ।
ચતુર્ભુજધરાયૈવ સહસ્રકિરણાય ચ ॥ ૩૫॥
સિદ્ધિબુદ્ધિપતે તુભ્યં સંજ્ઞાનાથાય તે નમઃ ।
વિઘ્નહન્ત્રે તમોહન્ત્રે હેરમ્બાય નમો નમઃ ॥ ૩૬॥
અનન્તવિભવાયૈવ નામરૂપપ્રધારિણે ।
માયાચાલક સર્વેશ સર્વપૂજ્યાય તે નમઃ ॥ ૩૭॥
ગ્રહરાજાય દીપ્તીનાં દીપ્તિદાય યશસ્વિને ।
ગણેશાય પરેશાય વિઘ્નેશાય નમો નમઃ ॥ ૩૮॥
વિવસ્વતે ભાનવે તે રવયે જ્યોતિષાં પતે ।
લમ્બોદરૈકદન્તાય મહોત્કટાય તે નમઃ ॥ ૩૯॥
યઃ સૂર્યો વિકટઃ સોઽપિ ન ભેદો દૃશ્યતે કદા ।
ભક્તિં દેહિ ગજાસ્ય ત્વં ત્વદીયાં મે નમો નમઃ ॥ ૪૦॥
કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારસ્વરૂપિણમ્ ।
ચતુર્ધા ભજ્ય સ્વાત્માનં ખેલસિ ત્વં ન સંશયઃ ॥ ૪૧॥
એવં સ્વસ્ય સ્તુતિં શ્રુત્વા વિકટો રૂપમાદધે ।
વામાઙ્ગે સંજ્ઞયા યુક્તં ગજવક્ત્રાદિચિહ્નિતમ્ ॥ ૪૨॥
(ફલશ્રુતિઃ)
તં દૃષ્ટ્વા પ્રણનામાથાનૂરુર્હર્ષસમન્વિતઃ ।
તં જગાદ ગણાધીશો વરં વૃણુ હૃદીપ્સિતમ્ ॥ ૪૩॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ ન સન્દેહશ્ચિન્તિતં સ લભેત્ પરમ્ ॥ ૪૪॥
શૃણુયાદ્વા જપેદ્વાઽપિ તસ્ય કિઞ્ચિન્ન દુર્લભમ્ ।
ભવિષ્યતિ મહાપક્ષિન્ મમ સન્તોષકારકમ્ ॥ ૪૫॥

ઇતિ અરુણકૃતા શ્રીભાનુવિનાયકસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૪૩ । ૬.૪૩ ૩૩-૪૫॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 43 . 6.43 33-45..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Bhanuvinayaka Stuti Arunakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*